# भारावतारस्तवः

अग्रे स्तुवत्सु विबुधेषु निशम्य शम्भो
डिम्भोचितानि वचनानि जडात्मनो मे ।
न्यग्रोधमूलवसते हसतस्तव द्रा
–गद्य श्लथीभवतु शाश्वतमौनमुद्रा ॥१॥

गर्ते पुनर्भवमये पतितेऽप्यमुष्मिन्
जन्तौ चिराय विषयामिषलोलुपत्वात् ।
अद्याप्यहो वद तदुद्धरणे तवायं
को वा पुरातनकिरातपते विलम्बः ॥२॥

यद्दक्षिणाभिमुखमीश्वर तिष्ठसि त्वं
मौनव्रताचरणचुञ्चुरजस्रमेव ।
तेन त्वयोरसि पुरा निहतस्य नूनं
भीतिं बिभर्ति शमनस्य मनोऽधुनापि ॥३॥

अर्धं तवैव गिरिराजसुता जहार
स्वामिन्महेश्वर ततो दनुजारिरर्धम् ।
एवम् स्थिते हर इति त्वयि शब्द एष
उन्मीलति त्रिभुवनस्य विडम्बनाय ॥४॥

त्र्यक्षोऽसि पश्यसि न मां पतितं भवाब्धौ
पञ्चाननोऽसि न वचोऽपि ददासि मह्यम् ।
ईशोऽसि दासजनमेनमुपेक्षसे च
स्थाणुः प्रकाशमधुनासि निरूपितस्त्वम् ॥५॥

एकत्र भिक्षुरपरत्र महेश्वरोऽसि
स्त्रीसङ्गतः क्वचन कुत्रचिदात्तयोगः ।
लीलाप्रदर्शितपरस्परभिन्नवेष-
स्तस्माद्विभो नियतमेव महानटस्त्वम् ॥६॥

आपूरिते त्रिजगता सकलेन कुक्षा-
वादाय दिग्वसन पाणिपुटे कपालम् ।
लोकस्य कस्य नु विभो वद वञ्चनाय
भिक्षापरायण इव भ्रमसि त्वमेवम् ॥७॥

दैत्यान्निहन्ति दशभिश्च विभाति रूपैः
सूते विधिं वहति पाति च विश्वमेतत् ।
देवार्धमेकमपि ते वपुषो यदीदृ-
क्को वा ग्रहीतुमपरं कथयेश्वरः स्यात् ॥८॥

कस्मैचन प्रणमते मुदितो विभुर्मां
विश्राणयेदिति शिरःशशिनोऽस्तु शङ्का ।

त्वन्मात्रभोज्य इति यो विहितो विधात्रा
धन्यः स एव पुनरीश्वर कालकूटः ॥९॥

ये श्रद्धया गिरिश दर्शितशिष्यभावा-
स्त्वामाश्रिता वटमहीरुहमूलभाजम् ।
साधारणोऽपि तृणरत्नशिलाविवेक-
स्तेषां न मूर्च्छति मनःस्विति कष्टमेतत् ॥१०॥

कल्पद्रुमोऽसि नमतामिति या स्तुतिस्ते
हेतुर्न तत्र तव दानविभूतिरेका ।
यत्तादृशस्त्वमसि पुण्यलवोज्झिताना-
मस्माकमप्यहह तत्तव दुर्लभत्वात् ॥११॥

कालो निरन्तरमदर्शिततारतम्ये
मोक्षान्धकारगहने यदि यापनीयः ।
भालस्पृशा भवदुपासनजन्मना किं
नेत्रान्तरेण फलमीश्वर भावुकानाम् ॥१२॥

आलम्बने जडतमस्य मम त्रपातः
स्यान्मीनमेषगणना त्रिदशान्तराणाम् ।
ऊरीकरिष्यति हि माममृतांशुमौलि-
र्देवो दिगम्बरतयापि न लज्जते यः ॥१३॥

शिष्यं यदीच्छसि विभो वटमूलवासि-
न्नाचार्य तत्र कथयामि विरिञ्चिमेकम् ।
नाद्यापि यो विरतिमेति लिखन्ननन्ता-
न्यस्मल्ललाटफलकेषु दुरक्षराणि ॥१४॥

नो वेद्मि विष्णुपदवीं न विधातृसद्म
स्वप्नेऽपि नैव कलितो विषयः सुराणाम् ।
काशीमवैमि भगवन्नगरीषु मुख्यां
मां यत्र नेष्यसि ततो नय तत्र शम्भो ॥१५॥

किं कुर्युरल्पमपि शक्रमुखाः सुरा मे
पीत्वा सुधामपि चिराय दिवङ्गता ये ।
निःशेषभुक्तगरलोऽप्यधुनापि कामं
मृत्युञ्जयो भवति यः स हि मे शरण्यः ॥१६॥

क्रुद्धोऽसि चेन्मयि विभो विहितापराधे
वीक्षस्व काममलिकान्तरचक्षुषा माम् ।
येनाञ्जसा गलितगात्रमदो भवेयं
भस्मात्मना शशिवतंस तवाङ्गरागः ॥१७॥

मां पाशपाणिरधुना मृड रूढवक्षः-

पूर्वव्रणोऽयमुपगच्छति मृत्युरुग्रः ।
बद्ध्वाशु तत्परिकरं भगवन्निजाङ्घ्रेः
सव्येतरस्य विनिवारय कीर्तिकण्डूम् ॥१८॥

मन्दाकिनी शिरसि ते शरणागताना–
मानन्दबाष्पविततिश्चरणारविन्दे ।
तत्पक्षपातरहितः कथय स्मरारे
का भूयसा तव तयोर्बहुमानपात्रम् ॥१९॥

बालेन्दुभूषण विभो सदयान्तरङ्गः
संसारगर्तगहनादपुनर्निवृत्त्यै ।
भिक्षाकपालकलनापरुषाङ्गुलिभ्यां
मामुद्धरिष्यसि कदा समये कराभ्याम् ॥२०॥

सन्तः स्वभावगुणिनस्तव पादपद्मे
दोषाकरः स तु निरन्तरमुत्तमाङ्गे ।
विद्वस्तदीदृशविभागविधानदक्षो
गौरीपते विषमदृष्टिरसि त्वमद्धा ॥२१॥

सैवाद्रिजा वपुषि सैव च मूर्ध्नि गङ्गा
कण्ठे पुनः पशुपते स हि कालकूटः ।
किं भूयसा कलितकाशिपुराः पुमांस–

स्त्वत्तो भवन्ति कलयापि न भिन्नरूपाः ॥२२॥

योगीश्वरान्नियमयन्नुतिवावदूका-
नाकर्णयिष्यति कदा मम जल्पितानि ।
हुङ्कारवारितगणेशगुहोपवेश-
मङ्कं प्रदास्यति कदा च महेश्वरो मे ॥२३॥

त्वत्पाणिजाङ्कुरविलूनशिराः कपालि-
न्नूनं विधिस्त्वयि बभूव भियानुकूलः ।
एवं न चेत् त्रिपुरमात्रजितः कुतस्ते
विश्वाधिपत्यमकुतोभयमीदृशं स्यात् ॥२४॥

चण्डांशुमण्डलभिदो विनिवारयन्मे
क्लान्तिं किरीटशशिनः शिशिरैर्मयूखैः ।
आविर्भविष्यति कदा नु दयालुरग्रे
सस्वागतोक्ति भगवानगजासहायः ॥२५॥

ज्ञानाञ्जनव्यतिकरोज्ज्वलदृष्टयस्त्व-
न्नामामृतश्रवणकल्पितकर्णपूराः ।
पञ्चाक्षरीमयमनोहरकण्ठभूषा-
स्त्वामाश्रयन्ति पुरुषा भव भक्तिमन्तः ॥२६॥

आरोप्य तस्करपतिं परमेश्वरत्वे
स्वस्थाः कथं भवथ नाम चिराय लोकाः ।
युक्त्या हरिष्यति यदा समये समस्तं
विज्ञास्यथ स्वयममुष्य तदा स्वरूपम् ॥२७॥

गाङ्गे निमज्जति जले निगमानधीते
घोरं तपश्चरति यन्नियमेन लोकः ।
तद्द्रष्टुमन्त्यसमये महिषं विहाय
भद्रं कुलाद्रिककुदं वृषभं पुरस्तात् ॥२८॥

त्वत्पादपङ्कजयुगे भवभीतिभाज-
स्तावन्महेश्वर भविष्यति मे विलापः ।
क्रोधेन वा करुणया तव देव यावत्
सम्पत्स्यते न सहसैव समाधिभङ्गः ॥२९॥

आरोहति त्रिभुवने कनकाचलं यो
जन्तुः स नूनमवरोहति कालयोगात् ।
आरोहतस्तु रजताचलमेकवारं
भूयो निवृत्तिरिति न श्रुतमीक्षितं वा ॥३०॥

त्वामाश्रयन्तमितरानवधूय देवा-
न्मामद्य नोद्धरसि चेत्तरुणेन्दुमौले ।

जानीहि नैष मम केवलमज्ञतायां
लोको हसिष्यति चिराय तवाप्यशक्तौ ॥३१॥

श्रद्धाय न श्रुतिवचांसि न वा मुमुक्षा–
मास्थाय न त्वयि विलोक्य महेश्वरत्वम् ।
सन्तस्तु शश्वदनपेक्षितहेतवस्त्वा–
मात्मानमस्य जगतो भव कामयन्ते ॥३२॥

नाहं प्रभो द्रविणदारसुताभिलाषी
मोक्षान्न किञ्चिदवरं परमेश याचे ।
शक्रादिषु त्वमपि नैकतमः सुरेषु
मोक्षान्न किञ्चिदवरम् प्रददासि पुंसे ॥३३॥

सत्यं ब्रवीमि सुचिरं भुवने चरित्वा
काशीजुषां भवति कापि विभूतिरन्या ।
अग्रे प्रसारितकराय महेश्वराय
भिक्षां प्रदातुमुचितां प्रभवन्त्यमी यत् ॥३४॥

हस्ते मृगस्तव महेश्वर गौरुपान्ते
भालान्तरालनयने ज्वलनः करालः ।
तद्ब्रूहि नश्यतु कथं न तृणायमाना
त्वामास्थिता कलयितुं मतिरस्मदीया ॥३५॥

संसारधन्वनि महीयसि तीव्रतापे
तृष्णाऽऽकुलेन मनसा नितरां भ्रमद्भ्यः ।
यन्नः प्रयच्छसि जलाञ्जलिमेवमग्रे
गङ्गाधरस्य तव तन्न विभो विचित्रम् ॥३६॥

यः सेवकः स्मररिपो तव भालदर्शी
तस्य स्मरो विशति नैव कदापि चित्तम् ।
मृत्युञ्जय श्रयति यश्चरणाम्बुजं ते
स्वामिन्न मृत्युरुपसर्पति जातुचित्तम् ॥३७॥

यैरर्प्यते कुसुममेकमनङ्गशत्रो
भक्त्या भवच्चरणयोः सकृदेव सत्त्वैः ।
तेषु प्रहर्तुमनसः कुसुमायुधस्य
चित्रं भवन्त्यकुसुमानि जगन्ति सद्यः ॥३८॥

लोकत्रयी विरचिता न जिता न पुष्पै–
रुद्द्योतिता न किरणैरथवा तमोघ्नैः ।
तत्क्रोधभाजनतयापि कथं पुरारे–
र्जायेत जन्तुहतको गणनीय एषः ॥३९॥

दिग्वाससो न च कपालभृतो न भिक्षा–

सञ्चारिणस्त्वमिव देव परे निलिम्पाः ।
तद्युक्तमेव भुवनाधिपते जनाना-
मेकोऽपि तेषु यदि शङ्करतां न धत्ते ॥४०॥

ब्रह्माच्युतप्रभृतिकानधिगम्य देवा-
नन्ते त्वदीयपदपङ्कजमीयुषो मे ।
त्वत्तः परो न भवतीति वचोऽस्ति यत्त-
न्न ज्ञानतः स्फुरति हन्त परन्तु भक्तेः ॥४१॥

व्यक्तं भवन्ति पुरुहूतमुखार्पितानि
कल्पद्रुमस्य कुसुमान्यपि निष्फलानि ।
बिल्वस्य पत्रमपि ते चरणारविन्दे
भक्त्यार्पितं भवति भर्ग फलाय पुंसां ॥४२॥

शर्वस्य मादृशजडाश्रयदानदोष-
स्तस्माद्वराणि कुरुते न सुरान्तराणि ।
ताराः शशीव न वहन्ति कलङ्कमङ्के
किं तेन ताः स्वरुचिभिस्तमतिक्रमेरन् ॥४३॥

एको वृषस्त्वयि विभो स पुनः पुराण-
स्त्वं यत्र तत्र न कदापि गवां प्रचारः ।
केन प्रलोभयसि तद्वसुना त्रिलोकीं

प्राप्तोऽसि यत्पशुपतित्वपदाभिषेकम् ॥४४॥

मौनी महेश्वर निषीदसि यस्य मूले
न्यग्रोधमात्रमवयन्तु परे जनास्तम् ।
संसारमोक्षपदयोः स्थितमन्तराले
सीमातरुं पुनरमी वयमीरयामः ॥४५॥

यन्निश्चलस्त्वमधुनाप्यसि चित्सभाया-
मप्युत्क्षिपन्ननिशमेकतरं निजाङ्घ्र्योः ।
तद्गृह्णतामपरमीश भुजोपपीडं
प्रत्येमि वैभवमहं त्वदुपाश्रितानाम् ॥४६॥

त्वत्ताण्डवेन भुवनानि हृतानि सत्यं
सत्यं बिभर्षि च विभो नटराजशब्दम् ।
एणाङ्कभूषण तथाप्यसि भावुकाना-
मग्रे वराभयकराभिनयानभिज्ञः ॥४७॥

अक्ष्णोः शनैरविषयीभवति प्रकाशे
काष्ठां प्रयाति भव बान्धवचक्रशोके ।
सङ्कोचमावहति जीवितपङ्कजे त्वां
सन्ध्यानटं प्रकटमप्यवलोकयेयम् ॥४८॥

यन्नर्तिता कविभिरौदरिकैरनल्पं
मातः सरस्वति पुरा पुरतो जडानाम्।
तन्मा शुचस्तव हि नाट्यविदां पुरोगः
सम्पत्स्यते नचिरमेव गुणग्रहीता ॥४९॥

श्रीशङ्करेणार्यगणेशवाचा
भारावतारस्तव एष चक्रे ।
तत्याज यस्मिन्नुदिते फणीन्द्रः
श्रीकण्ठकर्णाभरणप्रतिष्ठाम् ॥५०॥